# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ५३

स तथोक्तस्तु निर्भर्त्स्य कुम्भकर्णो महोदरम् ।
अब्रवीद्राक्षसश्रेष्ठं भ्रातरं रावणं ततः ॥१॥

सोऽहं तव भयं घोरं वधात्तस्य दुरात्मनः ।
रामस्याद्य प्रमार्जामि निर्वैरस्त्वं सुखीभव ॥२॥

गर्जन्ति न वृथा शूर निर्जला इव तोयदाः ।
पश्य सम्पाद्यमानं तु गर्जितं युधि कर्मणा ॥३॥

न मर्षयति चात्मानं सम्भावयति नात्मना ।
अदर्शयित्वा शूरास्तु कर्म कुर्वन्ति दुष्करम् ॥४॥

विक्लवानामबुद्धीनां राज्ञां पण्डितमानिनाम् ।
शृण्वतामादित इदं त्वद्विधानां महोदर ॥५॥

युद्धे कापुरुषैर्नित्यं भवद्भिः प्रियवादिभिः ।
राजानमनुगच्छद्भिः कृत्यमेतद्विनाशितम् ॥६॥

राजशेषा कृता लङ्का क्षीणः कोशो बलं हतम् ।
राजानमिममासाद्य सुहृच्चिह्नममित्रकम् ॥७॥

एष निर्याम्यहं युद्धमुद्यतः शत्रुनिर्जये ।
दुर्नयं भवतामद्य समीकर्तुं महाहवे ॥८॥

एवमुक्तवतो वाक्यं कुम्भकर्णस्य धीमतः ।
प्रत्युवाच ततो वाक्यं प्रहसन्राक्षसाधिपः ॥९॥

महोदरोऽयं रामात्तु परित्रस्तो न संशयः ।
न हि रोचयते तात युद्धं युद्धविशारद ॥१०॥

कश्चिन्मे त्वत्समो नास्ति सौहृदेन बलेन च ।
गच्छ शत्रुवधाय त्वं कुम्भकर्णजयाय च ॥११॥

आददे निशितं शूलं वेगाच्छत्रुनिबर्हणः ।
सर्वकालायसं दीप्तं तप्तकाञ्चनभूषणम् ॥१२॥

इन्द्राशनिसमं भीमं वज्रप्रतिमगौरवम् ।
देवदानवगन्धर्वयक्षकिंनरसूदनम् ॥१३॥

रक्तमाल्य महादाम स्वतश्चोद्गतपावकम् ।
आदाय निशितं शूलं शत्रुशोणितरञ्जितम् ।
कुम्भकर्णो महातेजा रावणं वाक्यमब्रवीत् ॥१४॥

गमिष्याम्यहमेकाकी तिष्ठत्विह बलं महत् ।
अद्य तान्क्षुधितः क्रुद्धो भक्षयिष्यामि वानरान् ॥१५॥

कुम्भकर्णवचः श्रुत्वा रावणो वाक्यमब्रवीत् ।
सैन्यैः परिवृतो गच्छ शूलमुद्गलपाणिभिः ॥१६॥

वानरा हि महात्मानः शीघ्राश्च व्यवसायिनः ।
एकाकिनं प्रमत्तं वा नयेयुर्दशनैः क्षयम् ॥१७॥

तस्मात्परमदुर्धर्षैः सैन्यैः परिवृतो व्रज ।
रक्षसामहितं सर्वं शत्रुपक्षं निसूदय ॥१८॥

अथासनात्समुत्पत्य स्रजं मणिकृतान्तराम् ।
आबबन्ध महातेजाः कुम्भकर्णस्य रावणः ॥१९॥

अङ्गदानङ्गुलीवेष्टान्वराण्याभरणानि च ।
हारं च शशिसङ्काशमाबबन्ध महात्मनः ॥२०॥

दिव्यानि च सुगन्धीनि माल्यदामानि रावणः ।
श्रोत्रे चासज्जयामास श्रीमती चास्य कुण्डले ॥२१॥

काञ्चनाङ्गदकेयूरो निष्काभरणभूषितः ।
कुम्भकर्णो बृहत्कर्णः सुहुतोऽग्निरिवाबभौ ॥२२॥

श्रोणीसूत्रेण महता मेचकेन विराजितः ।
अमृतोत्पादने नद्धो भुजङ्गेनेव मन्दरः ॥२३॥

स काञ्चनं भारसहं निवातं
विद्युत्प्रभं दीप्तमिवात्मभासा ।
आबध्यमानः कवचं रराज
सन्ध्याभ्रसंवीत इवाद्रिराजः ॥२४॥

सर्वाभरणनद्धाङ्गः शूलपाणिः स राक्षसः ।

त्रिविक्रमकृतोत्साहो नारायण इवाबभौ ॥ २५ ॥

भ्रातरं सम्परिष्वज्य कृत्वा चापि प्रदक्षिणम् ।
प्रणम्य शिरसा तस्मै सम्प्रतस्थे महाबलिः ।
तमाशीर्भिः प्रशस्ताभिः प्रेषयामास रावणः ॥ २६ ॥

शङ्खदुन्दुभिनिर्घोषैः सैन्यैश्चापि वरायुधैः ।
तं गजैश्च तुरङ्गैश्च स्यन्दनैश्चाम्बुदस्वनैः ।
अनुजग्मुर्महात्मानं रथिनो रथिनां वरम् ॥ २७ ॥

सर्पैरुष्ट्रैः खरैरश्वैः सिंहद्विपमृगद्विजैः ।
अनुजग्मुश्च तं घोरं कुम्भकर्णं महाबलम् ॥ २८ ॥

स पुष्पवर्षैरवकीर्यमाणो
धृतातपत्रः शितशूलपाणिः ।
मदोत्कटः शोणितगन्धमत्तो
विनिर्ययौ दानवदेवशत्रुः ॥ २९ ॥

पदातयश बहवो महानादा महाबलाः ।
अन्वयू राक्षसा भीमा भीमाक्षाः शस्त्रपाणयः ॥ ३० ॥

रक्ताक्षाः सुमहाकाया नीलाञ्जनचयोपमाः ।
शूरानुद्यम्य खड्गांश्च निशितांश्च परश्वधान् ॥ ३१ ॥

बहुव्यामांश्च विपुलान्क्षेपणीयान्दुरासदान् ।
तालस्कन्धांश्च विपुलान्क्षेपणीयान्दुरासदान् ॥ ३२ ॥

अथान्यद्वपुरादाय दारुणं लोमहर्षणम् ।
निष्पपात महातेजाः कुम्भकर्णो महाबलः ॥ ३३ ॥

धनुःशतपरीणाहः स षट्शतसमुच्छ्रितः ।
रौद्रः शकटचक्राक्षो महापर्वतसंनिभः ॥ ३४ ॥

संनिपत्य च रक्षांसि दग्धशैलोपमो महान् ।
कुम्भकर्णो महावक्त्रः प्रहसन्निदमब्रवीत् ॥ ३५ ॥

अद्य वानरमुख्यानां तानि यूथानि भागशः ।
निर्दहिष्यामि सङ्क्रुद्धः शलभानिव पावकः ॥ ३६ ॥

नापराध्यन्ति मे कामं वानरा वनचारिणः ।
जातिरस्मद्विधानां सा पुरोद्यानविभूषणम् ॥ ३७ ॥

पुररोधस्य मूलं तु राघवः सहलक्ष्मणः ।
हते तस्मिन्हतं सर्वं तं वधिष्यामि संयुगे ॥ ३८ ॥

एवं तस्य ब्रुवाणस्य कुम्भकर्णस्य राक्षसाः ।
नादं चक्रुर्महाघोरं कम्पयन्त इवार्णवम् ॥ ३९ ॥

तस्य निष्पततस्तूर्णं कुम्भकर्णस्य धीमतः ।
बभूवुर्घोररूपाणि निमित्तानि समन्ततः ॥ ४० ॥

उल्काशनियुता मेघा विनेदुश्च सुदारुणाः ।
ससागरवना चैव वसुधा समकम्पत ॥ ४१ ॥

घोररूपाः शिवा नेदुः सज्वालकवलैर्मुखैः ।
मण्डलान्यपसव्यानि बबन्धुश्च विहङ्गमाः ॥ ४२ ॥

निष्पपात च गृध्रेऽस्य शूले वै पथि गच्छतः ।
प्रास्फुरन्नयनं चास्य सव्यो बाहुरकम्पत ॥ ४३ ॥

निष्पपात तदा चोल्का ज्वलन्ती भीमनिस्वना ।
आदित्यो निष्प्रभश्चासीन्न प्रवाति सुखोऽनिलः ॥ ४४ ॥

अचिन्तयन्महोत्पातानुत्थिताँल्लोमहर्षणान् ।
निर्ययौ कुम्भकर्णस्तु कृतान्तबलचोदितः ॥ ४५ ॥

स लङ्घयित्वा प्राकारं पद्भ्यां पर्वतसंनिभः ।
ददर्शाभ्रघनप्रख्यं वानरानीकमद्भुतम् ॥ ४६ ॥

ते दृष्ट्वा राक्षसश्रेष्ठं वानराः पर्वतोपमम् ।
वायुनुन्ना इव घना ययुः सर्वा दिशस्तदा ॥ ४७ ॥

तद्वानरानीकमतिप्रचण्डं
दिशो द्रवद्भिन्नमिवाभ्रजालम् ।
स कुम्भकर्णः समवेक्ष्य हर्षान्
ननाद भूयो घनवद्घनाभः ॥ ४८ ॥

ते तस्य घोरं निनदं निशम्य
यथा निनादं दिवि वारिदस्य ।
पेतुर्धरण्यां बहवः प्लवङ्गा
निकृत्तमूला इव सालवृक्षाः ॥ ४९ ॥

विपुलपरिघवान्स कुम्भकर्णो
रिपुनिधनाय विनिःसृतो महात्मा ।
कपि गणभयमाददत्सुभीमं
प्रभुरिव किङ्करदण्डवान्युगान्ते ॥ ५० ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com